# ११ एकादश दशकः - ब्रह्म नारद संवादः

श्रीनारदः पद्मज मेकदाऽऽह पितस्त्वया सृष्ट मिदं जगत्किम् ।
किं विष्णुना वा गिरिशेन वा किं अकर्तृकं वा सकलेश्वरः कः ॥ ११-१॥

इतीरितोऽजः सुतमाह साधु पृष्टं त्वया नारद मां शृणु त्वम् ।
विभाति देवी खलु सर्वशक्ति - स्वरूपिणी सा भुवनस्य हेतुः ॥ ११-२॥

एकं परं ब्रह्म सदद्वितीयं आत्मेति वेदान्त वचोभि रुक्ता ।
न सा पुमान् स्त्री च न निर्गुणा सा स्त्रीत्वं च पुंस्त्वं च गुणैर्दधाति ॥ ११-३॥

सर्वं तदावास्य मिदं जगत्सा जाता न सर्वं तत एव जातम् ।
तत्रैव सर्वं च भवेत्प्रलीनं सैवाखिलं नास्ति च किञ्चनान्यत् ॥ ११-४॥

गौणानि चान्तः करणेन्द्रियाणि सा निर्गुणा ऽवाङ्मति गोचरा च ।
सा स्तोत्रमन्त्रैः सगुणा महद्भिः संस्तूयते भक्त विपन्निहन्त्री ॥ ११-५॥

सुधासमुद्रे वसतीयमार्या द्वीपे विचित्राद्भुत शक्ति युक्ता ।
सर्वं जगद्य द्वशगं वयं च त्रिमूर्तयो नाम यदाश्रिताः स्मः ॥ ११-६॥

तद्दत्त शक्ति त्रयमात्र भाजः त्रिमूर्तयः पुत्र वयं विनीताः ।
तदाज्ञया साधु सदाऽपि कुर्मः ब्रह्माण्ड सर्ग स्थिति संहृतीश्च ॥ ११-७॥

दैवेन मूढं कवि मातनोति सा दुर्बलं तु प्रबलं करोति ।
पङ्गुं गिरिं लङ्घयते च मूकं कृपावती चाऽतनुते सुवाचम् ॥ ११-८॥

यत्किञ्चि दज्ञायि मया महत्त्वं देव्यास्तदुक्तं तव सङ्ग्रहेण ।
सर्वत्र तद्वर्णय विस्तरेण विधत्स्व भक्तिं हृदये जनानाम् ॥ ११-९॥

इतीरितोऽजेन मुनिः प्रसन्नः तव प्रभावं करुणार्द्र चित्ते ।
व्यासं तथाऽन्यांश्च यथोचितं स प्रबोधयामास पवित्र वाग्भिः ॥ ११-१०॥

न मे गुरुस्त्व च्चरितस्य वक्ता न मे मतिस्त्व त्स्मरणैकसक्ता ।
अवाच्य वक्ताऽह मकार्य कर्ता नमामि मातश्चरणाम्बुजं ते ॥ ११-११॥